दिनाङ्क :- 24.06.2025 सायम् :- 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् आपरेशन् सिन्दूर् इत्यनेन आतङ्कवादस्य विषये भारतस्य शून्य-सहिष्णुता-नीते: दृढः वैश्विकसन्देशः प्रेषितोऽस्ति।
- श्रीनारायणगुरुवर्यस्य महात्मागान्धीवर्यस्य च ऐतिहासिकं वार्तालापं भारतस्य स्वातन्त्र्य-आन्दोलनाय नूतनां दिशां अयच्छदिति प्रधानमन्त्री उक्तवान्।
- अमरीकादेशस्य राष्ट्रपतिनः युद्धविरामस्य घोषणायाः अनन्तरम् अपि इरान्-देशः क्षिपणि-प्रहारं कृतवान् इति इस्राइल-देशः आरोपितवान्।
- श्वस्तनादारभ्य सम्पूर्णे वायव्यभारते वृष्टिः वर्धिष्यते इति ऋतुविज्ञानविभागस्य पूर्वानुमानमस्ति; मध्यप्रदेशे प्रचण्डवृष्टिः भविष्यति च सम्भाव्यते।
- एण्डर्सन्-तेण्डुल्कर्-क्रिकेट्-चषक-क्रीडायां, लीड्स्-नगरस्य हेडिङ्ग्ले-क्रीडाङ्गणे प्रथम-निकष-स्पर्धायाः पञ्चमे अन्तिमे च दिने इङ्ग्लैण्ड्-देशेन भारतं विरुध्य विनैव हानौ त्रिणवति धावनाङ्काः सन्ति विरचिताः।

<u>प्रधानमन्त्री-शताब्दपूर्तौ</u>

प्रधानमन्त्री नरेन्द्र मोदी अकथयत् यत् आपरेशन् सिन्दूर् इत्यनेन आतङ्कवादेति विषये भारतस्य शून्य-सहिष्णुता-नीते: प्रबलं वैश्विकं च सन्देशम् प्रेषितमस्ति। सः अवदत् यत् भारतीयनागरिकाणां हानिं जनयितारं कुत्रापि स्थानं सुरक्षितं नास्ति इति भारतं स्पष्टम् अकरोत्। अद्य नवदेहली-नगरे भारतस्य महान् आध्यात्मिक-नैतिकनेतृभ्यां श्रीनारायणगुरु-महात्मागान्धी-इत्येतयोः मध्ये आयोजितस्य ऐतिहासिक-संवादस्य शतवार्षिक-उत्सवे प्रधानमन्त्री भाषणं कुर्वन् आसीत्।

सः अवदत् यत् केरलस्य शिवगिरि-मठे एकशताब्देः पूर्वं श्रीनारायण-गुरु-महात्मा-गान्धी-इत्येतयोः मध्ये जातेन ऐतिहासिकसंवादेन स्वातन्त्र्य-आन्दोलनाय नूतना दिशा दत्ता।

सः इत्यपि अवदत् यत् शतवर्षपूर्वं, यदा जनाः सामाजिक-दुराचारान् विरुध्य वक्तुं भीतिमनुभवन्ति स्म, तदा श्रीनारायणगुरुः सत्येन, सेवया, सौहार्देन समानतया प्रगाढविश्वासेन च जनानां मार्गदर्शनमकरोत्। श्रीमोदी अवदत् यत् प्रेरणैषा राष्ट्रम् 'सबका साथ, सबका विकास' इत्यस्य मार्गे निरन्तरतया प्रेषयन्त्यस्ति।

<u>इस्रायेल्-इरान् युद्धविरामः</u>

अमरीकादेशस्य राष्ट्रपतिना डॉनल्ड् ट्रम्प् इत्यनेन युद्धविरामस्य घोषणायाः अनन्तरम् अपि इरान्-देशः क्षेपास्त्राणां प्रक्षेपणं कृतवान् इति इस्राइल्-रक्षा-बलम् उदघोषयत्। आई. डी. एफ़्. इत्यनेन ईरान्-देशात् नूतनं बैलेस्टिक्-क्षिपणि-प्रक्षेपणं प्रक्षिप्तमिति ज्ञातम्, उत्तर-इस्राइल्-प्रदेशे सैरन् इत्यस्य नादश्चाभवत् इत्यपि तेनोक्तम्। इरान्-देशेन सह द्वैपाक्षिक-युद्धविरामाय इस्राइल्-देशः सहमतः इत्युक्तेः कश्चित्कालानन्तरमेव एतत् जातम्। इस्राइल्-देशस्य प्रसारमाध्यमाः अवदन् यत् रक्षामन्त्री इस्राइल काट्ज़ इत्येषः इरान्-देशस्य राजधान्यां तेहरान्-नगरे तीव्र-आक्रमणाय आदेशं दत्तवान्। इरान्-देशः अमरीका-कतर्-देशयोः मध्यस्थतया कृतस्य युद्धविरामस्य उल्लङ्घनम् अकरोत् इति आरोपं आरोपितवान्। तत्सम्बद्धे विकासे इरानस्य उपविदेशमन्त्री कतार्-देशं प्रति कार्तज्ञभावान् प्रकटितवान् यत् सः अस्मिन् क्षेत्रे युद्धं निवारयितुं साहाय्यं कृतवान् इति। इतः पूर्वं इस्राइल्-देशः अमरीकायाः राष्ट्रपतिनः डॉनल्ड ट्रम्प् इत्यस्य ईरान्-देशेन सह युद्धविरामस्य प्रस्तावं स्वीकृतवान् आसीत्। प्रधानमन्त्री बेञ्जामिन् नेतन्याहु इत्यस्य कार्यालयात् प्राप्ते वक्तव्ये तेहरान्-क्षेत्रस्य परमाणु-बैलेस्टिक्-क्षिपणि-आपदायाः निवारणस्य लक्ष्यं प्राप्य सः युद्धविरामाय सहमतः अभवत् इति। वक्तव्ये इरानस्य परमाणु-विभीषिकायाः निर्मूलनार्थं संयुक्तराज्यामरीका-देशस्य समर्थनाय सहभागितायै च अपि आभारभावा: प्रकटिता: । नेतन्याहु-वर्यः अपि अवदत् यत् इस्रायेल्-देशः युद्धविरामस्य कस्यापि उल्लङ्घनस्य प्रबलतया प्रतिकारं करिष्यति इति। इदानीं इस्रेल्-इरान्-देशयोः मध्ये युद्धविरामः प्रचलन्नस्ति उभावपि देशौ युद्धविरामस्य उल्लङ्घनं मा कुरुताम् इति श्रीट्रम्पः उक्तवान्।

__ऑपरेशन्-सिन्धु:__

ऑपरेशन सिन्धु इत्यस्य अन्तर्गतं ईरान् देशात् **पञ्चनवत्यधिकद्विशतोत्तरद्विसहस्र-** भारतीय-नागरिका: गृहं प्रत्यानीता: विदेशमन्त्रालयस्य प्रवक्ता रणधीरजायसवाल: उक्तवान् यत् अद्य प्रात: काले ईरान् देशस्य मशाद-नगरात् विशेषविमानेन द्विनवत्यधिकद्विशतम् भारतीयनागरिका: नवदेहली-नगरं प्राप्तवन्त: इति। भारतीय वायुसेनाया: सी-17 विमानेन अपि ऑपरेशन सिन्धु इत्यस्य अन्तर्गतं इस्राइल देशात् **पञ्चषष्ट्युत्तरैकशतं** भारतीया: जना: निष्कासिता:। प्रत्यागतानाम् नागरिकाणां स्वागतम् सूचनाप्रसारणसंसदीय कार्य राज्य मन्त्री डॉक्टर एल. मुरूगन: अकरोत्। तेनोक्तञ्च यत् यात्रिका: द्वविंशति-भिन्नराज्येभ्य: सन्ति, ते च सर्वे अतीव प्रसन्ना: सन्तीति।

__बिहारे उपराष्ट्रपतिः__

उपराष्ट्रपतिः जगदीप धनखडः अद्य अवदत् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः सर्वकारस्य गतानि दशवर्षाणि, आर्थिकवृद्धेः, अभूतपूर्वसंरचनायाः च दृष्ट्या ऐतिहासिकानि आसन्। बिहारस्य मुज़फ़्फ़र्-नगरे एकस्मिन् कार्यक्रमे सम्बोधयन् धनखडः अवदत् यत्, आर्थिकवृद्धेः दृष्ट्या भारतं शक्तियुत-अर्थव्यवस्थासङ्घस्य एकादशतः चतुर्थस्थानं प्राप्य जगति बृहत्तमां प्रगतिम् अकरोदिति। सः अवदत् यत् अधुना यूनां कृते विकल्पानाम् प्राचुर्यं वर्तते इत्थं इतः पूर्वं कदापि नासीत्। धनखडः एन्. डी. ए. सर्वकारेण प्रवर्तितायाः नूतनशिक्षानीतेरपि प्रशंसाम् अकरोत्।

__निर्मला-व्यापारः__

केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनः अवदत् यत्, विनिर्माणस्य समर्थनाय निर्यातस्य प्रोत्साहनाय च शुल्कं न्यूनीकृत्य व्यापारस्य भारम् न्यूनीकर्तुं सर्वकारः अनेकान् उपायान् अकरोदिति। अद्य नवदेहली-नगरे एक्जिम्-ब्याङ्क्-ट्रेड्-कान्क्लेव् इत्येतं सम्बोधयन्ती श्रीमती सीतारामनः अवदत् यत्, देशस्य आहत्य निर्यातराशिः पञ्चविंशत्यधिकाष्टशत-बिलियन् परिमितं यू. एस्. डालर् इति सर्वकालिकं उच्चत्वम् अवाप्नोत्, पूर्ववर्षस्य अपेक्षया षट् प्रतिशतस्य वृद्धिश्च

अवाप्नोत्। मन्त्री अवदत् यत्, वैश्विक-निर्यातस्य वृद्धिः केवलं चतुर्प्रतिशतम् एव अभवत्, परन्तु भारतस्य निर्यातस्य वृद्धिः गत-वित्तीयवर्षे दशमलवत्र्यधिकषट् प्रतिशतम् आसीदिति।

<u>ऋतुविज्ञानविभाग</u>

ऋतुविज्ञानविभागेन पूर्वानुमानं कृतमस्ति यत् श्वस्तनादारभ्य सम्पूर्णे वायव्यभारते वृष्टिः वर्धिष्यते मध्यप्रदेशे च प्रचण्डवृष्टिः भविष्यति इति सम्भाव्यते।

<u>क्रिकेट्-इन्ड्-एन्गः</u>

एण्डर्सन्-तेण्डुल्कर्-क्रिकेट्-चषक-स्पर्धायां, इङ्ग्लैण्ड्-देशः कश्चित्कालपूर्वं, लीड्स्-नगरस्य हेडिङ्ग्ले क्रीडाङ्गणे प्रथम-निकष-क्रीडायाः पञ्चमे दिने भारतं विरुध्य विनैव हानौ सप्तदशोत्तरैकशत धावनाङ्कान् अरचयत्। आतिथेय-इङ्ग्लैण्ड्-देशः सप्तदशोत्तरैकशत धावनाङ्कानाम् लक्ष्यमनुधावति।